Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# त्रिपुराराज्ये संस्कृतशिक्षणमेकमध्ययनम्

प्रो. प्रभातकुमारमहापात्रः
आचार्यः, विभागाध्यक्षश्च, ज्योतिषविभागः, राष्ट्रियसंस्कृतसंस्थानम्, श्रीरणवीरपरिसरः, जम्मू

शिक्षां विना मानवः पशुवत् आचरति । अतः मानवाय उत्तमशिक्षा अत्यावश्यकी । उत्तमशिक्षया एव मानवस्य पशुवत् आचरणं परिष्कृतं भवितुम् अर्हति । सर्वेभ्यः उत्तमशिक्षाव्यवस्था भवेत् तदर्थं शिक्षायाः गुणवत्तावर्धनम् आवश्यकम् । शिक्षायाः गुणवत्तावर्धनाय भाषायाः सर्वोत्कृष्टं शिक्षणम् आवश्यकं विद्यते । यतो हि भाषां विना काऽपि शिक्षा समुन्नतिं न प्राप्नोति । किन्तु प्रश्नः समुदेति का भाषा स्वीकरणीया पठनीया वा इति । भाषाविषये राष्ट्रियशिक्षानीतौ (2020) उच्यते –

> **भाषा निःसंदेहं कलया संस्कृत्या च अविच्छिन्नरूपेण संयुक्ता वर्तते। विभिन्नभाषाः विश्वं विभिन्नरूपेण दर्शयन्ति अतः मूलरूपेण कस्यापि भाषायाः वक्ता स्वानुभवान् कथमवगच्छति कथं वा गृह्णाति, इदं सर्वं तस्याः भाषायाः संरचनाधारितं भवति । विशेषरूपेण भिन्नसंस्कृतेः जनस्य भाषा अन्यैः सह व्यवहारेण, परिवारसदस्यैः सह व्यवहारेण, आधिकारिकजनैः सह व्यवहारेण मित्रैः अपरिचितैः च सह व्यवहारेण प्रभाविता भवति एवं व्यवहारकाले सम्भाषणशैली अपि प्रभावं जनयति । संस्कृतेः संरक्षणाय संवर्धनाय प्रसाराय च अस्माभिः तस्याः संस्कृतेः भाषाणां संरक्षणं संवर्धनं च करणीयं भविष्यति ।**
>
> **(राष्ट्रियशिक्षानीतिः 2020, 22.4)**

प्राचीनकाले भारतीयशिक्षायाः कारणात् भारतं विश्वगुरुत्वेन विलसति स्म । अत्रत्यां शिक्षां स्वीकर्तुं विश्वस्य विभिन्नप्रान्तेभ्यः जनाः आगच्छन्ति स्म । तस्मिन् समये भारतीयशिक्षायाः माध्यमभाषा संस्कृतम् आसीत् । संस्कृतमाध्यमेन पठनपाठनादिकं चलति स्म । तस्मिन् एव समये संस्कृतभाषया विभिन्नाः उत्तमग्रन्थाः विरचिताः । तस्मिन् एव संस्कृते विद्यन्ते सर्वविधज्ञानप्रदायकविषयाः । शिक्षायाः लक्ष्यं विद्यते बालानां सर्वाङ्गीण-विकाससाधनम् इति । अत्र सर्वाङ्गीणविकासे शारीरिक-आध्यात्मिक-नैतिक-बौद्धिकविकासादयः समागच्छन्ति । साम्प्रतिकशिक्षा भवति वृत्तिमुखी शिक्षा अथवा परीक्षामुखी शिक्षा इति । सर्वाङ्गीणविकासाय काऽपि संस्था प्रयतमाना नैव दृश्यते । सर्वाः अपि संस्थाः परीक्षापरिणामविषये एव अवधानं ददति न तु ज्ञानप्राप्तये । समयानुगुणं संस्थानाम् एतादृशी अवस्था जाता जायमाना च अस्ति । तथापि शिक्षायाः गुणवत्तासंवर्धनाय सम्प्रति संस्कृतस्य सामर्थ्यं विद्यते । 2020 वर्षस्य राष्ट्रियशिक्षानीतौ संस्कृतभाषायाः विषये केचन बिन्दवः विशेषतया उक्ताः सन्ति -

> **भारतीय-संस्कृतेः भाषा । शास्त्रीयभाषा । प्राचीन-भाषा । आधुनिक-भाषा । आधुनिक-भारतीय-भाषाणां पोषिका । प्राचीन-भारतीय-ज्ञान-विज्ञानस्य भाषा । आधुनिक-ज्ञान-विज्ञानस्य आधारः । संस्कृतेः माध्यमस्य भाषा । साहित्य-कला-सङ्गीत-आधार-भाषा । नैतिकमूल्यानां भाषा । त्रि-भाषा-सूत्र-विशिष्ट-भाषा । बहु-अनुशासनात्मक-अध्ययन-भाषा । अनुसन्धान-प्रक्रिया-रूपेण संस्कृतम् ।**

संस्कृतस्य विषये राष्ट्रियशिक्षानीतौ (2020) विशेषतया उक्तं वर्तते यत् -

**संस्कृतभाषायाः महत्त्वपूर्णयोगदानम्, विभिन्नविधानां विषयाणां साहित्यम्, सांस्कृतिकमहत्त्वम्, भाषायाः अस्याः वैज्ञानिकप्रकृतिं च वीक्ष्य संस्कृतं केवलं संस्कृतपाठशालास्तरे विश्वविद्यालयस्तरे एव सीमितम् अकृत्वा मुख्यधारां प्रति समानीयते । रुचिपूर्णविषयरूपेण, नवाचारविधिना अन्य समसामयिक-प्रासंगिकविषयेषु यथा- गणितम्, खगोलशास्त्रम्, दर्शनशास्त्रम्, नाटकप्रभेदाः, इत्यादिषु समायोजनं भविष्यति ।**

(राष्ट्रियशिक्षानीतिः 2020, 22.15)

आधुनिकशिक्षायाः गुणवत्तावर्धने एतस्याः संस्कृतभाषायाः अवदानं महद् विद्यते । अस्मिन् लेखे आधुनिकशिक्षायै प्रयोजनीयाः संस्कृते विद्यमानाः उत्तमोत्तमविषयाः प्रस्तूयन्ते येषां पालनेन निश्चयेन आधुनिकशिक्षायाः गुणवत्तायां वृद्धिः भविष्यति इति निश्चप्रचं वक्तुं शक्यते । संस्कृतभाषायाः विषये उक्तं वर्तते -

**भारते संस्कृता भाषा कामधेनुः प्रकीर्तिता ।**
**जननी विश्वभाषाणां विज्ञानस्योपकारिणी ।।**

अर्थात् भारते संस्कृतभाषा कामधेनुः (देवलोकस्य धेनुः – एषा धेनुः वयं यत् इच्छामः तत् सर्वं ददाति) इति उच्यते । संस्कृतभाषा लोके सर्वभाषाणां माता अस्ति । शास्त्रस्यापि भाषा संस्कृतमेव ।

संस्कृतभाषायामेव एतादृशाः उत्प्रेरणात्मकाः सिद्धान्ताः दृश्यन्ते एवं संस्कृतं संस्कृतेर्मूलं भवति । अतः उच्यते –

**संस्कृतं संस्कृतेर्मूलं ज्ञानविज्ञानवारिधिः।**
**वेदतत्त्वार्थसंजुष्टं लोकाऽऽलोककरं शिवम् ।।**

संस्कृतस्य महत्त्वविषये सर्वजनविदितमेव । विश्वस्मिन् विश्वे एका एव भाषा विद्यते या सर्वविधज्ञानैः पूर्णा विद्यते । शारीरिकविकासे संस्कृतस्य अवदानम् अतीव महत्त्वपूर्णं वर्तते । केचन अंशाः प्रस्तूयन्ते –

1. एतस्याः एव संस्कृतभाषायाः वर्णानामुच्चारणं मानवशरीरस्य सर्वाङ्गं स्पृशति येन मानवस्य शारीरिकप्रभावः सन्दृश्यते ।
2. संस्कृतवर्णानां शुद्धतया उच्चारणेन शिशोः मस्तिष्कस्य विकासः शीघ्रतया भवति इति प्रमाणितं विद्यते ।
3. संस्कृतवर्णानाम् उच्चारणेन येषां वदने क्लेशः भवति तथा च निरन्तरं वक्तुं ये न शक्नुवन्ति तेषां परिष्करणं शीघ्रमेव सम्भवति ।
4. निःश्वासप्राश्वासयोः क्लेशः न भवति ।
5. सम्पूर्णशरीरस्य व्यायामः भवति ।

आध्यात्मिकज्ञानं विना मानवः अतीव कठोरः भवति तथा च असत्कार्ये लिप्तः भवति । स्वस्मिन् विश्वासः, भगवते विश्वासः, गुरूणाम् आदरः श्रद्धा इत्यादयः संस्कृतस्य अध्ययनेन शतप्रतिशतं समागच्छन्ति । तैत्तिरियोपनिषदि छात्रेभ्यः आध्यात्मिकज्ञानं दत्त्वा गुरुः उपदिशति -

**मातृदेवो भव । पितृदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि । ये के चास्माच्छ्रेयांसो ब्राह्मणाः तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । इत्यादि ज्ञेयम् ।**

इत्येवं संस्कृते विद्यमानविषयाणाम् अध्यापनेन अध्ययनेन छात्राणाम् आध्यात्मिकविकासः निश्चयेन भवति ।

नीतिशिक्षाप्रदानाय बहुविधाः परामर्शाः प्रदत्ताः विद्यन्ते । येषां प्रधानम् उदाहरणम् भर्तृहरिणा विरचितं शतकत्रयम् । शुक्रनीतिः, विदुरनीतिः, मनुस्मृतिः इत्यादिषु नीतिषु छात्राणां नैतिकविकासाय बहवः विषयाः विद्यन्ते । संस्कृते विद्यमानानि कानिचन नैतिकज्ञानप्रदायकानि उदाहरणानि एवं सन्ति –

**अयं निजः परो वेति गणना लघुचेतसाम्**

**उदारचरितानान्तु वसुधैव कुटुम्बकम् ।**

वेदेऽपि वर्तते –

**तिस्रो वदग्ने शरदस्त्वामिच्छुचिं धृतेनशुचयः सपर्यान् ।**

**नामानि चिद्दधिरे यज्ञियान्यसूदयन्त तन्वः सुजाताः ।।**

अर्थात् कोऽपि मनुष्यः अपठित्वा विद्वान् न भवति । विद्यां विना मानवजीवनं सफलं नैव भवति । अतः सर्वैरपि विद्यार्जनं करणीयम् ।

संस्कृतभाषा वैज्ञानिकी भाषा इति प्रायेण सर्वैः वैज्ञानिकैः अङ्गीक्रियते । अतः सहस्रवत्सरेभ्यः अस्याः अध्ययनम् अध्यापनञ्च चलद् विद्यते । अधुना तु समाजस्य आवश्यकताम् अवलोक्य अस्याः प्रयोजनम् अधिकं विद्यते यतो हि अनया बौद्धिकविकासः शीघ्रमेव जायते इत्यतः । कथमिति चेत् अस्याः व्याकरणमेव एतादृशं विद्यते यत् सम्पूर्णतया वैज्ञानिकम् । वर्णानामुच्चारणम्, शब्दनिर्माणम्, क्रियाप्रयोगः, वाक्यनिर्माणम्, प्रत्ययप्रयोगः, लिङ्गज्ञानं चेत्यादीनां ज्ञानेन छात्राणां बौद्धिकविकासः शीघ्रमेव जायते । उदाहरणं यथा –

वर्णोच्चारणं जिह्वा-तालु-कण्ठ-मूर्धदन्तोष्ठ-ओष्ठ-कण्ठोष्ठादीनाम् उच्चारणे छात्रैः अवधानं देयं भवति तथा च एतेषां प्रयोगेण छात्राणां निश्चयेन बौद्धिकविकासः सम्भवति । शब्दनिर्माणे सन्धिज्ञानं, समासज्ञानं, लिङ्गज्ञानं, शब्देषु अपि अजन्तशब्दाः, हलन्तशब्दाः, प्रत्ययप्रयोगः चेत्यादीनां ज्ञानं छात्राणां वुद्धेः विकासं शीघ्रमेव करोति ।

अतः एव निश्चप्रचं वक्तुं शक्यते यत् शिक्षायाः उद्देश्यप्राप्तये सर्वाङ्गीणविकासाय संस्कृतभाषा सर्वप्रकारेण प्रथमस्थानम् अवाप्नोति ।

**त्रिपुराराज्ये संस्कृतशिक्षणम्-** त्रीणि पुराणि विद्यन्ते यस्यां भूमौ सा त्रिपुरा इति त्रिपुरायाः विग्रहवाक्यं कर्तुं शक्यते । अर्थात् त्रिपुरा इति पदं संस्कृतपदं वर्तते । सम्प्रति त्रिपुराराज्ये संस्कृतशिक्षणं धाराद्वये प्रचलति ।

1. पारम्परिकधारायाम्
2. आधुनिकधारायाम्

1. पारम्परिकधारायाम्

- गुरुकुलशिक्षा
  1. भोलानन्दवेदविद्यालयः (भोलनन्दसेवा-आश्रम, कुञ्जवनम्, अगरतला, 799006)
  2. गुरुकुल-आश्रमः (धर्मनगरम्)
- विश्वविद्यालयीयशिक्षा

केन्द्रीयसंस्कृतविश्वविद्यालयस्य एकलव्यपरिसरः (लेम्बुछरा, अगरतला, 799210)

2. आधुनिकधारायाम्

- सर्वकारीयविद्यालयेषु सप्तम-अष्टमकक्ष्ययोः ऐच्छिकरूपेण संस्कृतशिक्षणं प्रचलति ।
- सीबीएसई विद्यालयेषु षष्ठकक्ष्यातः दशमकक्ष्यापर्यन्तम् ऐच्छिकरूपेण संस्कृतशिक्षणं प्रचलति ।
- त्रिपुराविश्वविद्यालये स्नातक-स्नातकोत्तर-विद्यावारिधिपदवीनां कृते संस्कृतविभागः वर्तते ।
- 13 महाविद्यालयेषु संस्कृतविभागः वर्तते यत्र स्नातकस्तरीयं संस्कृतशिक्षणं प्रचलति ।

   1. महाराजा बीर बिक्रम कॉलेज, अगरतला

2. बीर विक्रम मेमोरियल कॉलेज, अगरतला
3. रामठाकुर कॉलेज, अगरतला
4. महिलामहाविद्यालयः, अगरलता
5. खोवाई कॉलेज, खोवाई
6. कमलपुर कॉलेज, कमलपुर
7. रामकुष्णमहाविद्यालय, कैलाशहर
8. अम्बेदकर कॉलेज,
9. धर्मनगर कॉलेज
10. अमरपुर कॉलेज
11. बिलोनीया कॉलेज, बिलोनीया
12. साब्रून कॉलेज
13. नेताजीसुभाष कॉलेज, उदयपुर

- महाराजवीरविक्रमविश्वविद्यालये केन्द्रीयसंस्कृतविश्वविद्यालयस्य पक्षतः संस्कृताध्ययनकेन्द्रं प्रचलति । यत्र संस्कृतभाषायाः प्रमाणपत्रीयपाठ्यक्रमः तथा च डिप्लोमापाठ्यक्रमः प्रचलति।

एवमेव संस्कृतशिक्षणं त्रिपुराराज्ये सततं प्रवर्तमानं वर्तते। संस्कृतं संस्कृतेः मूलम्। उक्तं च संस्कृतविषये – '**भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा**' इति। विश्वमिदं कुटुम्बभावनया परस्परं व्यवहरेत् इति चिन्तयामः चेत् संस्कृतमेव माध्यमभाषात्वेन भवितुम् अर्हति यतो हि संस्कृते एव एषा भावना निहिता वर्तते –

**सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चित् दुःखभाग्भवेत्॥**

सन्दर्भः ग्रन्थसूची–

1 – राष्ट्रियशिक्षानीतिः 2020
2 – तैत्तिरियोपनिषद
3 – Tripura Rahasyam – Mahatmya Khandam – with Hindi Translation – Vol – 1